National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 68-70
© 2025 NJHSR
www.sanskritarticle.com

**डॉ.कृष्णचन्द्रकविः**
अध्यापकः, पुराणेतिहासविभागे,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ.कृष्णचन्द्रकविः**
अध्यापकः, पुराणेतिहासविभागे,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# पुराणेषु व्रतपर्वोत्सवादीनां माहात्म्यानुशीलनम्

**डॉ.कृष्णचन्द्रकविः**

**शोधसारः-**

कर्मणा जीवः नानाविधानि जन्मानि लभते। तस्मात् विमुक्तये शास्त्रप्रतिपादितेषु विविधेषु उपायेषु भक्तियोगःकश्चन श्रेष्ठोपायः इति मन्यते। विशेषतः कलौ युगे अल्पायुषः अल्पबुद्धयः कथं स्वल्पेनैव कालेन मोक्षमार्गेऽधिकारिणः भवेयुः कथं च सायुज्यादिमुक्तिः प्राप्नुयुः एतस्मिन् विषये विस्तृता चर्चा भक्तिशास्त्रेषु उपलभ्यते। भक्तिशास्त्राणि व्रतपर्वोत्सवादीनि भक्तेरङ्गानि इति स्वीकुर्वन्ति किंच व्रतपर्वोत्सवाः भक्तिरसस्य उद्दीपनविभावरूपाः इति आमनन्ति। व्रतपर्वोत्सवाः अस्माकं संस्कृतेः परम्परायाः भारतीयतायाश्च महान् परिचायकाः सन्ति। एतस्मिन् शोधकर्मणि व्रतपर्वोत्सवादीनां किं स्वरूपं किं च तेषामाध्यात्मिकरहस्यं तन्मयादौ विचारितम्। व्रतपर्व-उत्सवादिशब्दानां वैयाकरणसिद्धान्तानुसारं अर्थप्रतिपादनं विहितम्। व्रतोपवासादीनां कः प्रकृष्टः कालः कदा किं व्रतमाचरणीयं भगवतः पर्वोत्सवाः कदा पालनीयाः व्रतोपर्वोत्सवादिषु के तावत् अधिकारिणः व्रतीनां कः पालनीयः धर्मः व्रतरक्षां च कथं कुर्यात् विषयेऽस्मिन् विस्तृता चर्चा कृता। अन्ते च व्यासप्रणीतेषु पुराणशास्त्रेषु व्रतादीनां किं महत्त्वं तत् व्रतानां परिपालनेन के च राजानः सन्यासिनःऋषयः महर्षयश्च किं फलं प्राप्तवन्तः तेषां च का गतिः संयाता एते विषयाः अत्र विस्तृतरूपेणालोचिताः।

**कूटशब्दाः**- जीवः, पुराणः, व्रतम्, धर्मः च इत्यादयः

**प्रस्तावना-**

**जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।**
**तस्मादपरहार्येर्थे न त्वं शोचितुमर्हसि।।**

इति भगवद् वचनात् सिद्ध्यति एतत् यत् प्रत्येकस्य जीवस्य मरणात् परं पुनः जन्म भवत्येव तथैव जन्मनः परं मृत्युरवश्यं स्यात् । भगवतः इदमाप्तवाक्यं मनसि संस्थाप्यास्माभिः सदा चिन्तनीयं जीवः सदा जन्ममरणचक्रे निपतति अनन्तं दुष्पारं च दुःखं यावज्जीवं भुङ्क्ते। अस्याः परम्परायाः विमुक्तये अस्माभिः चेष्टा करणीया। शास्त्रेषु जीवमात्रस्य आत्यन्तिककल्याणाय मोक्षाय वा ज्ञानकर्मभक्त्याख्याः त्रयोयोगाः प्रतिपादिताः सन्ति। सत्सु विविधेषु उपायेषु भक्तियोगः कश्चन अनौपम्यः उपायः वर्तते। सेयं भक्तिःसाधनं भावः प्रेमभक्तिरूपेण त्रिविधा कुत्रचित् एकाङ्गा अनेकाङ्गा भेदेनापि द्विविधा इत्यपि वदन्ति। सा एकाङ्गभक्तिः श्रवणकीर्त्तनादिभेदेन नवविधा जायते आसु नवविधासु भक्तिसु व्रतपर्वोत्सवाः अन्तर्भुक्ताः भवन्ति कथमेतेषामुष्ठानं करणीयं तान् एव विषयान् अत्र आलोचयिष्यामः।

भारतीयधार्मिकाध्यात्मिकपरम्परायां सृष्टेरादिमकालतः व्रतपर्वोत्सवादीनां महन्महत्वं वर्तते। व्रतपर्वोत्स-वादीनां सम्यक् अनुष्ठानं तेषां नियमानामपि विधिपूर्वकं पालनम् यथाविधि आचारव्यवहारप्रदर्शनमपि मनुष्याणां शरीरे आरोग्यमुत्पादयति। एतेषां माध्यमेन प्राणिमात्रस्य मानसिकसन्तुलनमपि जायते। शरीरमनबुद्धि-आचारविचारादयः शुद्धाः निर्मलाश्च जायन्ते येनेहलौकिकाभ्युदयपूर्वकं पारलौकिक-परमकल्याणस्य प्राप्तिरपि सुलभायते। यथा दूषितधातूनां निर्घर्षणछेदनतापताडनेन शुद्धिः क्रियते तथैव शरीरस्य शुद्धिः तपस्यया व्रतेन च जायते। शरीरस्य बाह्याङ्गानां शुद्धिः शुद्धजलेन लेपेन सुगन्धितद्रव्य-

प्रयोगेण च जायते परमान्तरिकाङ्गानां मनबुद्धिचेतोऽहंकारादीनां शुद्धिः सत्यरूपकेण जलेन अहिंसारूपकेण व्रतेन च जायते येन मानवमात्रस्य भावविचारवचनानि समस्तानि च आचरणानि निर्मलानि विशुद्धानि संजायन्ते। अतः शरीरस्य बाह्याभ्यन्तरशुद्धये पवित्रतायै च व्रतस्यास्ति परमावश्यकता। अस्मादेवकारणात् प्राचीनकालतः भारतीयसनातनसांस्कृतिकपरम्परायां व्रतपर्वोत्सव-विधानं तेषां चापि यथाविधि-अनुष्ठानं कथं करणीयं तद्विषये विस्तृता चर्चा अस्माके शास्त्रेषु अवलोक्यते।

**व्रत -पर्व-उत्सवशब्दस्यार्थः-**

व्रियते इति व्रतम् , यस्यार्थः भवति वरणम्, अनुपालनम्,ग्रहणम्, आचरणं च। वृञ् वरणे इति धातोः कर्मणि अतच् प्रत्यये व्रतशब्दस्य निष्पत्तिः जायते, अपि च वृञ् आवरणे , वृतु वर्तने , वृतु वरणे ,वृतु व्यवहारे, व्रति नियमने इत्यादिधातुभ्यः व्रतशब्दस्य निष्पत्तिः भवति। फलतः व्रतशब्दस्य पुण्यजनकोपवासः नियमः निष्ठा अनुष्ठानम्, नियमनम् , निषिद्धवस्तुवर्जनम्, संकल्पः, संयमः नियामकेत्यादिनैके अर्थाः भवन्ति। अमरकोषे व्रतनियमौ पर्यायवाचकाविति मन्यते तथा उपवासपुण्यकादयः तस्य भेदाः सन्ति इति उक्तमस्ति।[1]

महाभारतस्य अनुशासनपर्वणि 149 अध्याये विष्णुसहस्र-नामस्तोत्रे पितामहभीष्मदेवेन विष्णोः कृते सुव्रत इति पदं वारद्वयं प्रयुक्तम्। यस्यार्थः भवति शोभनं व्रतं जगद्व्यवस्थादि नियमो यस्य स सुव्रतः अत्र व्रतशब्दः व्यवस्था नियमार्थे च प्रयुक्तः।

**नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।**
**विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः।।**

अर्थात् जलक्षीरयोः पृथक् करणे यदि हंसः आलस्यं कुर्यात् तर्हि संसारे द्वितीयः क एतादृशः भवेत् यो स्वकीयकुलधर्मस्य पालनं कुर्यात्। पद्येऽस्मिन् कुलपरम्परागतकर्त्तव्यकर्म व्रतरूपेणाभिहितोऽस्ति। पितामहेन भीष्मदेवेनाजीवनं ब्रह्मचर्यव्रतं धारितम्, अत्र व्रतशब्दः संकल्परूपेण गृहीतः। एवं प्रकारेण व्रतशब्दस्य धात्वर्थविशेषता भेदेन नैके अर्थाः समुद्भवन्ति। प्रसङ्गानुसारमपि व्रतशब्दस्य विशेषार्थः प्रकाशितः भवति। निष्कर्षतः एतदेव ज्ञेयं यत् सत्कर्माचरणं व्रतम्। कर्मसंकल्पधारणं व्रतम्। धर्माचरणं व्रतम्। पुण्यप्राप्तये विशेषतिथि-वारानुसारं उपवासपालनं व्रतम्। शास्त्रविहितकर्मणां यथाविधिपालनं व्रतमिति वक्तुं शक्यते। एवं व्रतशब्दस्य नैके अर्थाः भवितुमर्हन्ति।

नित्यम्, नैमित्तिकम्, काम्यभेदेन व्रतस्य त्रयो भेदाः भवन्ति। अत्र अवधेयं यत् नित्यं तथा नैमित्तिककर्मणः नित्यनैमित्तिकं व्रतं भिन्नमस्ति। नित्यकर्मसम्पादने पुण्यं न जायते परम् अकरणे पापं भवति। यथा द्विजातीनां कृते सन्ध्यावन्दनम्। नैमित्तिककर्म सम्पादने पुण्यं भवति अकरणे पापानि जायन्ते, यथा सूर्यग्रहणचन्द्रग्रहणान्ते स्नानं पुण्यदायकं परम् अस्नानानाचमने पापं भवति। तत् काम्यकर्म भवति यत्र तत् साधने पुण्यं जायते अनाचरणे अपुण्यं न जायते। एते तु कर्मणः भेदाः तेषां फलानि च, परं नित्यनैमित्तिककाम्य-व्रतानामनुष्ठानेन सदा पुण्यानि वर्द्धन्ते एव। यथा पुण्यप्राप्तये एकादशीत्यादिनि पुण्यव्रतानि पाल्यन्ते, पापक्षयपूर्वकं पुण्यप्राप्तये चान्द्रायणादिनि नैमित्तिकव्रतानि एवमपि सुखसौभाग्यादिप्राप्तये विविधकामनया वटसावित्री, अनन्तचतुर्दशीत्यादि व्रतानि क्रियन्ते।

**पर्वोत्सवौ-**

भ्वादिगणीय पर्वधातौ अच् प्रत्यये पर्वशब्दस्य निष्पत्तिः भवति यस्यार्थः पूर्णमथवा ग्रन्थियुक्तमिति उच्यते। मेषादिद्वादशराशीनां महायोगः पर्व इति कथ्यते। पूर्णिमातिथौ सुर्यचन्द्रमसः 180 अंशे अवस्थानं पर्व इत्यपि कथयन्ति। तथैव सूर्यचन्द्रमसोः शून्यांशे अवस्थितौ सति द्वितीयं पर्व जायते। चन्द्रसूर्यग्रहणयोः अन्धकाराच्छन्नास्थितिरपि पर्वपदेनाभिधीयते। एवं प्रकारेण प्रत्येकस्य गृहस्थस्य कृते चतुर्विंशपर्वाणि भवन्ति। यथा द्वादशसंक्रान्तयः चन्द्रमसः चतस्रः तिथयः, प्रातः कालः, सायं कालः, महापुरुषाणां (पितृपुरुषाणाम्) जन्ममृत्युदिनम्, स्वजन्म, विवाहः, सूर्यचन्द्रयोः ग्रहणं च। सूञ् धातु अदादि, तुदादि, दिवादिगणेषु प्रयुक्तोऽस्ति यस्यार्थः भवति उत्पन्नं, जन्म, प्रेरणञ्च। तेषु अर्थेषु यदि उत् उपसर्गः अप् प्रत्ययश्च सूञ् धातौ योज्यते चेत् तदा उत्सवशब्दः(उत्**+** सू**+** अप्**=**)निष्पद्यते। यस्यार्थःभवति आमोदः, प्रमोदः, हर्षः, सुखम्, प्रसन्नता, आनन्दः, संप्राप्तिः, उन्नतिः प्रकाशः। युद्धवीराणां कृते धर्मयुद्धं उत्सवपदेन कथ्यते। अयं बलस्योत्सवः इति वेदाः कथयन्ति।[2] समाजस्याहितकारिणां वधोऽपि उत्सव इति कथ्यते। यथा आश्विनमासे रावणस्य वधः उत्सवरूपेणास्माभिः पाल्यते।

**व्रतोपवासानुष्ठानकालमहत्त्वम्-**

अस्माकं परम्परायां यस्य कस्यापि कर्मणः शुभारम्भे उपयुक्तस्य कालस्य अपेक्षा क्रियते एव। कालस्य महत्त्वं स्वीकृत्य देवलस्मृतिः कथयति यत्र मासपक्षतिथीनामुच्चारणं विना कर्माणि क्रियन्ते तानि कर्माणि प्रायशः शुभफलदायकानि न भवन्ति। अतः कर्मणः प्रारम्भे अमुकदेशकाले अमुकदेवशर्मा भगवत् प्रीत्यर्थं अथवा अमुकफलप्राप्तये अमुकव्रतमहं करिष्ये इति संकल्पःअवश्यमेव करणीयः।[3] मार्कण्डेय-महापुराणमपि कथयति **संकल्प्य विधिवत् कुर्यात् स्नानदानव्रता-दिकम्।** अतः व्रतनिमित्तं श्रुतिस्मृतिपुराणनिर्देशितः यः कालः तमेव कालमनुसृत्य व्रतमाचरेत्।

**व्रताधिकारिणः-**

कैः जनै किं व्रतमाचरणीयं तेषामपि कः धर्मः भवेत् एतस्मिन् विषये पुराणेषु बहु चर्चा विलोक्यते। विषयेऽस्मिन् स्कन्दमहापुराणं कथयति यः वर्णाश्रमधर्मं पालयति यस्य मनः शुद्धं वर्त्तते यस्तु अलोभी सत्यवादी श्रद्धावान् प्राणिकल्याणतत्परः निष्पापी दम्भरहितः अनास्तिकः बुद्धिमान् च स एव व्रतस्याधिकारी भवितुमर्हति।[4] सर्वव्रतेषु कतिपयाः सामान्यधर्माःभवन्ति ते यथा क्षमादानम्,सत्यवचनम्,दानम्, शौचम्, इन्द्रियनिग्रहः देवपूजा अग्नौ हवनम्, सन्तोषः, अस्तेयम्,च[5]। एवमेव पुराणेषु व्रताधिकारिणः तेषां च धर्माः निरूपिताः।

**व्रतरक्षणम्-**

संकल्प-दृष्टि-न्यायोचितवचन-स्पर्श-संयोगेन व्रतरक्षणं भवति। अत एव पापमयचिन्तनं परित्यज्य पवित्रसंकल्पचिन्तनेन व्रतस्य रक्षणं जायते।[6]

गरुडपुराणानुसारं प्राचीनकाले राजर्षिधुन्धुमारः दानेन नियमपालनेन तपस्यया व्रताचरणेन च शतपुत्राणां जनको जातः। राजर्षेः सगरस्य नाम सर्वविदितमस्ति सोऽपि राजा व्रतोपवासबलेन शतपुत्राणां पिता बभूव। महाराजदशरथः सदा सत्यपरायणः व्रतपरः आसीत् सोऽपि राजा यज्ञेन दानेन तपस्यया तथा योगबलेन च भगवन्तं पुरुषोत्तमं नारायणं तुष्टवान् फलस्वरूपेण स्वयं भगवान् श्रीरामः तस्य पुत्रत्वं प्राप्तवान्। राजर्षिजनकः स्वयं तपोव्रतादीनां विग्रहरूपः आसीत् सोऽपि व्रतप्रभावेन परमातुलनीयैश्वर्यं योगिजनयोग्यां गतिं च प्राप्तवान्।[7] कूर्मपुराणवचनानुसारं यः व्रतोपवासनियमानुसारं करोति होम- स्वाध्याय-तर्पण-यज्ञ-दान-समाधिना च भगवन्तं महादेवमर्चयति सः भगवत् कृपया दुर्लभरुद्रसायुज्यं सारूप्यं सामीप्यं सालोक्यं च मोक्षं प्राप्नोति।[8] व्रतमाहात्म्यं प्रतिपादयन् स्कन्दमहापुराणं विवृणोति य पूर्वजन्मनि भूताधिपतेः शङ्करस्य पूजनं नैव कृतं व्रतानुष्ठानमपि नैव साधितं सः दरिद्रता रोगशोकादिभिः दग्धो भूत्वा पश्चात्तापं प्रोप्नोति।[9] ये सदा व्रतपरायणाः केवलं भगवतः शिवस्य नामानि स्मरन्तः तिष्ठन्ति तस्य समीपमुग्राः भयङ्कराः पाशधारिणः यमदूताः नागच्छन्ति इति स्कन्दमहापुराणस्यापरं वचनमुपलभ्यते।[10] यः मनुष्यःपूर्वजन्मनि व्रतो-पवासैः भगवन्तं श्रीविष्णुं नैव सन्तोषितवान् स एतस्मिन् जन्मनि ग्रहरोगव्याधिकष्टादिभिः पीडितः भवति इति विष्णुधर्मोत्तर-पुराण-स्याभिमतम्।[11] व्रताचरणेन उपवासेन नियमपरिपालनेन तथा विविधदानेन देवऋषिमुनयः सांसारिकाः प्राणिनश्च संतुष्टाः भवन्ति।[12] उपवासेन समं तपः नास्ति। महामति महर्षि विश्वामित्रः दिव्यवर्षसहस्राणि तपः आचरितवान् तत् प्रभावेण च स ब्रह्मत्वं प्राप्तवान् व्रतोपवासेन विविधदेवतार्च्चनेन च अन्ते स्वर्गवासमपि लब्धवान्। सर्वेऽपि ऋषयः व्रतोपवासपरिपालनेन विविधसिद्धिः अधिगतवन्तः। आत्मनः कल्याणकामिनः ये नराः व्रतोपवासपरायणाः सन्त तदाचरन्ति ते नरकद्वारं नैव पश्यन्ति।[13] पुराणानि सन्ति अध्यात्ममार्गे प्रेरणप्रदायकानि शास्त्राणि सदा एतानि यथा प्राणिमात्रस्य इहलौकिकं पारलौकिकं च कल्याणं भवेत् यथा तथैव चिन्तयन्ति। अष्टादशपुराणसाहित्ये एतदेव तथ्यं सर्वत्र विराजते येन केनापि प्रकारेण मनुष्येषु अध्यात्मवादस्य विकास भवेत् इति दिक्।

**उपसंहारः-**

मनुष्यः आजन्मनः मृत्युं यावत् बहुविधान क्लेशान् सहते तेभ्यः विमुक्तये अस्माभिः यत्नः करणीयः सदास्माभिः भक्तिप्रतिपादकानि शास्त्राणि मननीयानि तैः प्रतिपादिताः मार्गाः अपि अनुसरणीयाः। समाजे प्रचलिताः विविधाः व्रतपर्वोत्सवाः पुराणशास्त्राधारिताः एव सन्ति। अतः एतेषां शास्त्राणां सम्यक् अध्ययनेन सर्वेऽपि सामाजिकाः मानवाःभक्तिरसनिमग्नाः ईश्वरभावापन्नाः सन्तः आस्तिकाः भवेयुः। कलिकलुषितेऽस्मिन् संसारे भक्तिगंगाप्रवाहकानां पुराणानां आत्मविमुक्तये अवश्यमेवाध्यनमस्माभिः करणीयमिति दिक्।

**सहायकग्रन्थाः-**


**महाभारतम् -** गोविन्द भवन कार्यालय, गीताप्रेस, गोरखपुर

**कूर्मपुराणम्-** राष्ट्रिय संस्कृत संस्थानम् , जनकपुरी, नई दिल्ली

**मार्कण्डेयपुराणम् -** राष्ट्रिय संस्कृत संस्थानम् , जनकपुरी, नई दिल्ली

**अमरकोषः -** चौखम्बा सुरभारती प्रकाशन, वाराणसी

**कल्याणपत्रिका -** गोविन्द भवन कार्यालय, गीताप्रेस, गोरखपुर


**पाद टिप्पणी:-**

1 नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकम्। (अमरकोष2/7/37)

2 तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय। (ऋक् 1/100/8 )

3 मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्।। देवलस्मृतिः

4 निजवर्णाश्रमाचारनिरतः शुद्धमानसः।
अलुब्धः सत्यवादी च सर्वभूतहिते रतः।।
व्रतेष्वधिकृतोराजन्नन्यथा विफलः श्रमः।
श्रद्धावान् पापभीरुश्च मददम्भविवर्जितः।।
पूर्वनिश्चयमाश्रित्य यथावत् कर्मकारकः।
अवेदनिन्दको धीमानधिकारी व्रतादिषु।।

5 क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः।
देवपूजाग्निहवनं सन्तोषऽस्तेयमेव च।
सर्वव्रतेष्वयं धर्मःसामान्यो दशधास्थितः।।

6 संकल्पाद् दर्शनाच्चैव तद्युक्तवचनादपि।
संस्पर्शादथ संयोगात् पञ्चधारक्षितं व्रतम्।। (महा. अनुशासन 145)

7 धुन्धुमारस्तु राजर्षिर्लेभे पुत्रशतं पुरा।
दानेन नियमेनैव तपसा च व्रतेन च।।
सगरो नाम राजर्षिर्दिक्षु सर्वासु विश्रुतः।
पुत्राणां च शतं प्राप्तं तेन राज्ञा महात्मना।।
तथा दशरथो राजा व्रतेषु निरतः सदा।
यज्ञदानतपोयोगैः सन्तुष्टःपुरुषोत्तमः।
स्वये पुत्रत्वमापेदे तस्य राज्ञो महात्मनः।।
जनको नाम राजर्षिस्तपोव्रतनिधिः स्वयम्।
ऐश्वर्यमतुलं प्राप्य योगिनां गति माप्नुयात्।। (गरुडपुराणम्)

8 अर्चयन्ति महादेवं यज्ञदानसमाधिभिः।
व्रतोपवासनियमैर्होमैः स्वाध्यायतर्पणैः।।
तेषां वै रुद्रसायुज्यं सामीप्यं चाति दुर्लभम्।
सलोकतां च सारुप्यं जायते तत् प्रसादतः।। (कूर्मपुराणम्)

9 न पूजितो भूतपतिः पुरा यैर्व्रतं न चीर्णं न च सत्यमुक्तम्।
दारिद्र्यशोकामयदुःखदग्धाः प्रायोऽनुशोचन्ति त एव सर्त्याः।।
(स्कन्दपुराणम्)

10 ये सर्वदा व्रतपराश्च शिवं स्मरन्ति तेषां न दृष्टिपथमप्युपयान्ति दूताः।
याम्या महाभयकृतोऽपि च पाशहस्ताः दंष्ट्राकरालवदना विकटोग्रवेषा।।
(स्कन्दपुराणम्)

11 व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषितः।
ते नरा मुनिशार्दूल ग्रहरोगादिबाधिनः।। (विष्णुधर्मोत्तरपुराणम्)

12 व्रतोपवासनियमैर्नानादानैस्तथा नृप।
देवादयो भवन्त्येव तेषां प्रीता न संशयः।। (भविष्यपुराणम्)

13 उपवासैस्तथा तुल्यं तपः कर्म न विद्यते।।
दिव्यं वर्षसहस्रं तु विश्वामित्रेण धीमता।
तपसाक्रान्तमेकेन भक्तेन स च विप्रत्वमागतः।।
उपोष्य विधिवद्देवांस्त्रिदिवं प्रतिपेदिरे।
ऋषयश्च परां सिद्धिमुपवासैरवाप्नुयुः।।
यो कुर्वन्ति उपवासांश्च विधानेन शुभान्विता।
न यान्ति ते मुनिश्रेष्ठ नरकान् भीमदारुणान्।। (पद्मपुराणम्)